## हनस्तोऽचिण्णलोः । (३२/२५७४)

तद्धितेषु इति निवृत्तम्, तत्सम्बद्धं[1] किति इत्यपि । ञ्णिति इति वर्तते । हनः तकारोदेशो भवति ञिति, णिति प्रत्यये परतः चिण्णलौ वर्जयित्वा । घातयति । घातकः । साधुघाती । घातंघातम् । धातो वर्तते । अचिण्णलोः इति किम् ? अघानि । जघान[2] । धातोः कार्यमुच्यमानं धातोः प्रत्यये विज्ञायते । इह न भवति, वार्त्रघ्नम् (म.भा. ३.३२२) इतरत् इति ॥

## आतो युक् चिण्कृतोः। (३३/२७६१)

आकारान्तस्य अङ्गस्य चिणि कृति ञ्णिति [3]युगागमो भवति । अदायि । अधायि । कृति[4] – दायः । दायकः । धायः । धायकः । चिण्कृतोः इति किम् ? ददौ । दधौ । चौडिः, बालाकिः, [5]बाह्वादित्वात् (४.१.९६/१०९६) इञ् । ज्ञा देवता अस्य ज्ञः ॥

## नोदात्तोपदेशस्य मान्तस्यानाचमेः । (३४/२७६३)

उदात्तोपदेशस्य मान्तस्याङ्गस्य आचमिवर्जितस्य चिणि कृति च ञ्णिति[6] यदुक्तं तन्न भवति । किं च [7]उक्तम्? 'अत उपधायाः' (७ २.११६/२२८२) इति वृद्धिः । अशमि । अतमि । अदमि । कृति [8]खल्वपि – शमकः । तमकः । दमकः । शमः । तमः । दमः । उदात्तोपदेशस्य इति किम् ? यामकः । रामकः । कथम् उद्यमोपरमौ ? 'अड उद्यमे' (धा. पा. ३५८), 'यम उपरमे' (धा. पा. ९८५) इति निपातनादनुगन्तव्यौ । उपदेशग्रहणम् किम् ? शमी, दमी, तमी [9]इत्यत्र यथा स्यात्, इह [10]मा भूत्, यामकः, रामकः इति । मान्तस्य इति किम् ? चारकः । पाठकः । अनाचमेः इति किम् ? आचामकः ।

[८४४] अनाचमिकमिवमीनामिति वक्तव्यम् ।

आचामः । कामः । वामः । [11]आमः इति चौरादिकस्य णिचि वृद्धौ सत्यां भवति । तत्र हि मित्त्वं नास्ति 'नान्ये मितोऽहेतौ' (ग.सू. १७७) इति । [12]सूर्यविश्रामा भूमिः इत्येवमा[13]दिकं प्रयोगमन्याय्यमेव मन्यन्ते । चिण्कृतोः इत्येव, शशाम । तताम ॥

## जनिवध्योश्च । (३५/२५१२)

जनि वधि इत्येतयोः चिणि कृति च ञ्णिति यदुक्तं तन् न भवति । अजनि । जनकः । [14]प्रजनः । अवधि । वधकः । वधः । वधिः प्रकृत्यन्तरं व्यञ्जनान्तोऽस्ति, तस्यायं प्रतिषेधो [15]विधीयते । भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते इति हि प्रयोगो दृश्यते । वधादेशस्य अदन्तत्वादेव वृद्धेरभावः । चिण्कृतोः इत्येव, 'जजान गर्भं महिमानमिन्द्रम्' (अ.वे. ३.१०.१२) ॥

---

1. ञिति णिति प्रत्यये इत्यनुवर्तते इत्यधिकम् इ. 2. कंसं किल वासुदेवः इत्यधिकम् क. 3. च प्रत्यये परतः इत्यधिकम् इ. 4. प्रत्यये इत्यधिकम् क. 5. बाह्वादित्वादिञ् नास्ति क.इ.ह. 6. प्रत्यये इत्यधिकम् क. 7. उक्तम् नास्ति इ. 8. खल्वपि नास्ति इ. 9. इत्यपि क. 10. च इत्यधिकम् ब. 11. कथं इत्यधिकम् ब.क. 12. सूर्यविश्रमभूमिः क.इ, सूर्यविश्रामभूः ड. 13. आदिकं प्रयोगं नास्ति क. 14. प्रजनः नास्ति क. 15. क्रियते क.